श्री सिद्ध कुञ्जिका स्तोत्रम्

Shri Siddha Kunjika Stotram

Source: Internet Archive — Shri Durga Saptashati, Gita Press, 1952 first edition, scan pp. 143–144, printed pp. 139–140 (controlling print). Also compared: Sanskrit Documents — Siddha Kunjika Stotram (research comparison only); Vaidika Vignanam — Siddha Kunjika Stotram (variant comparison).

VERSE विनियोग

श्री गणेशाय नमः।

ॐ अस्य श्रीकुञ्जिकास्तोत्रमन्त्रस्य सदाशिव ऋषिः, अनुष्टुप् छन्दः, श्रीत्रिगुणात्मिका देवता, ॐ ऐं बीजं, ॐ ह्रीं शक्तिः, ॐ क्लीं कीलकम्, मम सर्वाभीष्टसिद्ध्यर्थे जपे विनियोगः।

Shri Ganeshaya Namah |
Om Asya Shri Kunjika-stotra-mantrasya Sadashiva Rishih, Anushtup Chhandah, Shri Trigunatmika Devata, Om Aim Bijam, Om Hrim Shaktih, Om Klim Kilakam, Mama Sarvabhishta-siddhyarthe Jape Viniyogah ||

VERSE 1

शिव उवाच।
शृणु देवि प्रवक्ष्यामि कुञ्जिकास्तोत्रमुत्तमम्।
येन मन्त्रप्रभावेण चण्डीजापः शुभो भवेत्॥१॥

Shiva Uvacha |
Shrinu Devi Pravakshyami Kunjika-stotram Uttamam |
Yena Mantra-prabhavena Chandi-japah Shubho Bhavet ||1||

VERSE 2

न कवचं नार्गलास्तोत्रं कीलकं न रहस्यकम्।
न सूक्तं नापि ध्यानं च न न्यासो न च वार्चनम्॥२॥

Na Kavacham Nargala-stotram Kilakam Na Rahasyakam |
Na Suktam Napi Dhyanam Cha Na Nyaso Na Cha Varchanam ||2||

VERSE 3

कुञ्जिकापाठमात्रेण दुर्गापाठफलं लभेत्।
अति गुह्यतरं देवि देवानामपि दुर्लभम्॥३॥

Kunjika-patha-matrena Durga-patha-phalam Labhet |
Ati Guhyataram Devi Devanam Api Durlabham ||3||

VERSE 4

गोपनीयं प्रयत्नेन स्वयोनिरिव पार्वति।
मारणं मोहनं वश्यं स्तम्भनोच्चाटनादिकम्।
पाठमात्रेण संसिद्ध्येत् कुञ्जिकास्तोत्रमुत्तमम्॥४॥

Gopaniyam Prayatnena Svayonir Iva Parvati |
Maranam Mohanam Vashyam Stambhanochchatanadikam |
Patha-matrena Samsiddhyet Kunjika-stotram Uttamam ||4||

VERSE 5

अथ मन्त्रः।
ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे।
ॐ ग्लौं हुं क्लीं जूं सः ज्वालय ज्वालय ज्वल ज्वल प्रज्वल प्रज्वल ऐं ह्रीं क्लीं चामुण्डायै विच्चे ज्वल हं सं लं क्षं फट् स्वाहा॥५॥
इति मन्त्रः।

Atha Mantrah |
Om Aim Hrim Klim Chamundayai Vichche |
Om Glaum Hum Klim Jum Sah Jvalaya Jvalaya Jvala Jvala Prajvala Prajvala Aim Hrim Klim Chamundayai Vichche Jvala Ham Sam Lam Ksham Phat Svaha ||5||
Iti Mantrah |

VERSE 6

नमस्ते रुद्ररूपिण्यै नमस्ते मधुमर्दिनि।
नमः कैटभहारिण्यै नमस्ते महिषार्दिनि॥६॥

Namaste Rudra-rupinyai Namaste Madhu-mardini |
Namah Kaitabha-harinyai Namaste Mahishardini ||6||

VERSE 7

नमस्ते शुम्भहन्त्र्यै च निशुम्भासुरघातिनि।
जाग्रतं हि महादेवि जपं सिद्धं कुरुष्व मे॥७॥

Namaste Shumbha-hantryai Cha Nishumbhasura-ghatini |
Jagratam Hi Mahadevi Japam Siddham Kurushva Me ||7||

VERSE 8

ऐङ्कारी सृष्टिरूपायै ह्रीङ्कारी प्रतिपालिका।
क्लीङ्कारी कामरूपिण्यै बीजरूपे नमोऽस्तु ते॥८॥

Ainkari Srishti-rupayai Hrinkari Pratipalika |
Klinkari Kama-rupinyai Bija-rupe Namo'stu Te ||8||

VERSE 9

चामुण्डा चण्डघाती च यैकारी वरदायिनी।
विच्चे चाभयदा नित्यं नमस्ते मन्त्ररूपिणि॥९॥

Chamunda Chanda-ghati Cha Yaikari Varadayini |
Vichche Chabhayada Nityam Namaste Mantra-rupini ||9||

VERSE 10

धां धीं धूं धूर्जटेः पत्नी वां वीं वूं वागधीश्वरी।
क्रां क्रीं क्रूं कुञ्जिका देवि शां शीं शूं मे शुभं कुरु॥१०॥

Dham Dhim Dhum Dhurjateh Patni Vam Vim Vum Vagadhishvari |
Kram Krim Krum Kunjika Devi Sham Shim Shum Me Shubham Kuru ||10||

VERSE 11

हुं हुं हुङ्काररूपिण्यै जं जं जं जम्भनादिनी।
भ्रां भ्रीं भ्रूं भैरवी भद्रे भवान्यै ते नमो नमः॥११॥

Hum Hum Hunkara-rupinyai Jam Jam Jam Jambhanadini |
Bhram Bhrim Bhrum Bhairavi Bhadre Bhavanyai Te Namo Namah ||11||

VERSE 12

अं कं चं टं तं पं यं शं वीं दुं ऐं वीं हं क्षम्।
धिजाग्रं धिजाग्रं त्रोटय त्रोटय दीप्तं कुरु कुरु स्वाहा॥१२॥

Am Kam Cham Tam Tam Pam Yam Sham Vim Dum Aim Vim Ham Ksham |
Dhijagram Dhijagram Trotaya Trotaya Diptam Kuru Kuru Svaha ||12||

VERSE 13

पां पीं पूं पार्वती पूर्णा खां खीं खूं खेचरी तथा।
म्लां म्लीं म्लूं मूलविस्तीर्णा कुञ्जिकास्तोत्र हेतवे।
सां सीं सूं सप्तशती देव्या मन्त्रसिद्धिं कुरुष्व मे॥१३॥

Pam Pim Pum Parvati Purna Kham Khim Khum Khechari Tatha |
Mlam Mlim Mlum Mula-vistirna Kunjika-stotra Hetave |
Sam Sim Sum Saptashati Devya Mantra-siddhim Kurushva Me ||13||

VERSE 14

कुञ्जिकायै नमो नमः।
इदं तु कुञ्जिकास्तोत्रं मन्त्रजागर्तिहेतवे।
अभक्ते नैव दातव्यं गोपितं रक्ष पार्वति॥१४॥

Kunjikayai Namo Namah |
Idam Tu Kunjika-stotram Mantra-jagarti-hetave |
Abhakte Naiva Datavyam Gopitam Raksha Parvati ||14||

VERSE 15

यस्तु कुञ्जिकया देवि हीनां सप्तशतीं पठेत्।
न तस्य जायते सिद्धिररण्ये रोदनं यथा॥१५॥
इति श्रीरुद्रयामले गौरीतन्त्रे शिवपार्वतीसंवादे कुञ्जिकास्तोत्रं सम्पूर्णम्॥

Yas Tu Kunjikaya Devi Hinam Saptashatim Pathet |
Na Tasya Jayate Siddhir Aranye Rodanam Yatha ||15||
Iti Shri Rudrayamale Gauri-tantre Shiva-Parvati-samvade Kunjika-stotram Sampurnam ||